शुतुद्रा विपाशायां मिलिता । (अस्या नामनिरुक्तिर्यथा, महाभारते । १ । १७८ । ९ ।
"शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता ॥")
तत्पर्य्यायः । शितद्रुः २ । इत्यमरः ॥ शुतुद्रिः ३ शतद्रुः ४ । पुत्त्रशोकसन्तप्तो वशिष्ठः कण्ठे शिलां बद्ध्वा नद्यामस्यां प्रविष्टस्ततो भीत्या इयं शतधा द्रुता इति शतद्रुः । इति तट्टीकायां भरतः ॥ (एतद्वृत्तान्तस्तु महाभारते ।१।१७८। अध्याये द्रष्टव्यः ॥) अस्या जलगुणाः ।

"शतद्रोर्विपाशायुजः सिन्धुनद्याः
सुशीतं लघु स्वादु सर्व्वामयघ्नम् ।
जलं निर्म्मलं दीपनं पाचनञ्च
प्रदत्ते बलं बुद्धिमेधायुषञ्च ॥"

इति राजनिर्घण्टः ॥

शतधा, स्त्री, दूर्व्वा । इति शब्दचन्द्रिका ॥

शतधा, व्य, (शत + धाच् ।) शतप्रकारम् । यथा,

"आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्त्तते ।
शतधा भिद्यते मूर्द्ध्नि शिरीवस्य फलं यथा ॥"

इति महाभारतम् ॥

शतधामा, [न्] पुं, (शतं धामानि वर्त्मानि यस्य ।) विष्णुः । इति जटाधरः ॥

शतधारं, क्ली, (शतं धाराः कोट्यो यस्य ।) वज्रम् । इति त्रिकाण्डशेषः ॥ शतधारायुक्ते, त्रि । यथा,—

"वसोः पवित्रमसि शतधारं वसोः पवित्रमसि
सहस्रधारम् ।
वसोः पवित्रेण शतधारेण सुत्वा कामधुक्षः ॥"

इति पशुपतिपद्धतिः ॥

शतधृतिः, पुं, इन्द्रः । (यथा, महिम्नः स्तोत्रे ।
"रथः क्षौणी यन्ता शतधृतिरगेन्द्रो धनुरथो ॥")
ब्रह्मा । इति मेदिनी ॥ (यथा, भागवते ।७।४।१।
"एवं वृतं शतधृतिर्हिरण्यकशिपोरथ ॥")
स्वर्गः । इति विश्वः ॥

शतपत्त्रं, क्ली, (शतं पत्त्राणि यस्य ।) पद्मम् । इत्यमरः ॥ (यथा, महाभारते ।३।६८। २० ।
"इमामसितकेशान्तां शतपत्त्रायतेक्षणाम् ॥")

शतपत्त्रः, पुं, (शतं पत्त्राणि पक्षा यस्य ।) मयूरः । सारसः । दार्व्वाघाटपक्षी । इति मेदिनी ॥ राजकीरः । तुरी इति भाषा । इति हेमचन्द्रराजनिर्घण्टौ ॥ (यथा, महाभारते । ३ । १०८ । ८ ।
"मयूरैः शतपत्त्रैश्च जीवञ्जीवककोकिलैः ॥")

शतपत्त्रकः, पुं, (शतपत्त्र + स्वार्थे कन् ।) दार्व्वाघाटपक्षी । इत्यमरः ॥ काठ्ठोक्रा इति भाषा ॥

शतपत्त्रनिवासः, पुं, (शतपत्त्रे निवासो यस्य ।) ब्रह्मा । इति कविकल्पलता ॥ पद्मस्थे, त्रि ॥

शतपत्त्री, स्त्री, (शतं पत्त्राणि यस्याः । ङीप् ।) पुष्पविशेषः । सेउती इति भाषा । पाटलवर्णासौ गोलाव इति वदन्ति । तत्पर्य्यायः । सुमनाः २ सुशीता ३ शिववल्लभा ४ सौम्यगन्धी ५ शतदला ६ सुदला ७ शतपत्त्रिका ८ । अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । कषायत्वम् । कुष्ठमुखस्फोटपित्तदाहनाशित्वम् । पथ्यत्वम् । सुरभित्वञ्च । इति राजनिर्घण्टः ॥

शतपत्त्रिका, स्त्री, (शतपत्त्री + कन् । टाप् । अत इत्वम् ।) शतपत्त्री । इति राजनिर्घण्टः ॥

शतपथिकः, त्रि, (शतपथमधीते तद्वेद इति वा ।) "शतषष्टेः षिकन् पथो बहुलम् ।" ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या शत-शब्दोत्तरपथिन्-शब्दात् षिकन्प्रत्ययेन निष्पन्नः ।) नानामतावलम्बी । नानापथगामी । इति सिद्धान्तकौमुदी ॥

शतपदचक्रं, क्ली, (शतं पदानि कोष्ठा यस्य तच्च तच्चक्रञ्चेति ।) नाम्ना नक्षत्रज्ञानार्थं चक्रम् । यथा,—

"चक्रं शतपदं वक्ष्ये कथाशास्त्रसम्भवम् ।
नामादिवर्णतो ज्ञेया क्षराद्यंशकास्तथा ॥
तिर्य्यगूर्द्ध्वगता रेखा रुद्रसंख्या लिखेद्बुधः ।
जायते कोष्ठकानाञ्च शतैकं १००नाच संशयः ॥
अ-व-क-ह-डा ऐशान्यां म-ट प-र-ता हरिति
चाग्नेय्याम् ।
न-य-भ-ज-खा नैरृत्यां ग-स-द-च-ला वाय-
याम् ॥
पञ्च पञ्च क्रमेणैव विंशवर्णान् प्रयोजयेत् ।
पञ्चस्वरसमायोगे एकैकं पञ्चधा कुरु ॥
अवर्णाद्यास्त्रयो ज्ञेयाः सन्ध्यक्षरयुतास्तथा ।
सजातीयैक्यमास्थाय पञ्चस्वरविनिर्णयः ॥
ऋदृलृनोरप्यकारेण शेन सस्य परिग्रहः ।
कुर्य्यात् क-पु-सु-दुस्थाने चोणि चीण्यक्षराणि
च ।
कु-घ-ङ-छा भवेत् स्तम्भे रौद्रे त्वीशानगोचरे ।
पु-ष-ण-ठा भवेत् स्तम्भे हस्ते चाग्नेयसंज्ञके ॥
सु-ध-फ-ढा भवेत् स्तम्भे पूर्व्वाषाढ़े च नैरृते ।
दु-थ-झ-ङा भवेत् स्तम्भे वायव्ये भाद्र उत्तरे ॥
एवं स्तम्भचतुष्कञ्च ज्ञातव्यं स्वरवेदिभिः ॥
धिष्ण्यानि कृत्तिकादीनि प्रत्येकं चतुरक्षरैः ।
साभिजिन्त्यंशकास्तत्र शतैकं द्वादशाधिकम् ॥
यद्वर्णांशककोष्ठस्थः क्रूरः सौम्योऽपि वा ग्रहः ।
तत्रस्थो वेधयेत् सम्यक् पुंसो नामादिमाक्षरम् ॥
सौम्यैर्विद्धं शुभं ज्ञेयमशुभं पापखेचरैः ।
मिश्रैर्मिश्रफलं तत्र निर्व्वेधेन शुभाशुभम् ॥
यद्वाच्यं सर्व्वतोभद्रे ग्रहोपग्रहवेधतः ।
शुभाशुभफलं सर्व्वं तदिहापि विचिन्तयेत् ॥"

पञ्चस्वरा अ-इ-उ-ए-ओकारास्तैर्योगे धिष्ण्यानि नक्षत्राणि । अत्र चतुर्भिर्व्वर्णैरेकनक्षत्रं यथा,— अ इ उ ए ३ । ओ व वि वु ४ । वे वो क कि ५ । कु घ ङ छ ६ । के को ह हि ७ । हु हे हो ड ८ । डि डु डे डो ९ । म मि मु मे १० । मो ट टि टु ११ । टे टो प पि १२ । पु ष ण ठ १३ । पे पो र रि १४ । रु रे रो त १५ । ति तु ते तो १६ । न नि नु ने १७ । नो य यि यु १८ । ये यो भ भि १९ । भु ध फ ढ २० । भे भो ज जि २१ । जु जे जो ख । ० । खि खु खे खो २२ । ग गि गु गे २३ । गो स सि सु २४ । से सो द दि २५ । दु थ झ ञ २६ । दे दो च चि २७ । चु चे चो ल १ । लि लु ले लो २ । सत्वयुक्तः अकारयुक्तेन ज्ञेयः । ह्रस्वेन दीर्घो ज्ञेयः । तालव्यशकारेण दन्त्यसकारो ज्ञेयः । इति शतपदचक्रम् । इति ज्योतिस्तत्त्वम् ॥

शतपदी, स्त्री, (शतं पादा यस्याः । ङीप् ।) बहुपदयुक्तकीटविशेषः । काणविछा इति काणकोटारी इति च भाषा । तत्पर्य्यायः । कर्णजलौका २ । इत्यमरः ॥ कर्णकीटी ३ भीरुः ४ शतपादिका ५ कर्णजलुका ६ । इति शब्दरत्नावली ॥ शतपात् ७ शतपादी ८ । इति जटाधरः ॥ शतावरी । इति राजनिर्घण्टः ॥

शतपद्मं, क्ली, श्वेतकमलम् । यथा,—

"शतपद्मं महापद्मं पुण्डरीकं सिताम्बुजम् ॥"

इति रत्नमाला ॥

शतपर्व्वा, [न्] पुं, (शतं पर्व्वाणि यस्य ।) वंशः । इत्यमरः ॥ इक्षुभेदः । यथा,—

"शतपर्व्वा भवेत् किञ्चित्कोशकारगुणान्वितः ।
विशेषात् किञ्चिदुष्णश्च सक्षारः पवनापहः ॥"

इति भावप्रकाशः ॥

शतपर्व्वा, स्त्री, (शतं पर्व्वाणि यस्याः ।) दूर्व्वा । वचा । भार्गवपत्नी । (यथा, महाभारते । ५ । ११७ । १३ ।
"इहस्पतिश्च तारायां शुक्रश्च शतपर्व्वया ॥")
कोजागरपूर्णिमा । इति शब्दरत्नावली ॥ कटुका । इति राजनिर्घण्टः ॥

शतपर्व्विका, स्त्री, (शतपर्व्वा + कन् । टापि अत इत्वम् ।) दूर्व्वा । वचा । इति मेदिनी ॥ यवः । इति शब्दरत्नावली ॥

शतपर्व्वेशः, पुं, (शतपर्व्वाया ईशः ।) शुक्रग्रहः । इति त्रिकाण्डशेषः ॥

शतपात्, } स्त्री, (शतं पादा यस्याः । पादस्य
शतपादू. } पात् ।) कर्णजलौकाः । इति जटाधरः ॥

शतपादिका, स्त्री, (शतपाद + स्वार्थे कन् + टाप् । अत इत्वम् ।) काकोली । इति जटाधरः ॥ कर्णजलौकाः । इति शब्दरत्नावली ॥

शतपुष्पः, पुं, भारविः । स तु किरातार्ज्जुनीयग्रन्थकर्त्ता । इति त्रिकाण्डशेषः ॥

शतपुष्पा, स्त्री, (शतं पुष्पाणि यस्याः ।) शाकविशेषः । इति भरतः ॥ शलुफा इति ख्याता । (यथा, इहत्संहितायाम् । ५१ । १५ ।
"गन्धमांसिशतपुष्पया वदेत् ॥")
तत्पर्य्यायः । सितच्छत्रा २ अतिच्छत्रा ३ मधुरा ४ मिसिः ५ अवाक्पुष्पी ६ कारवी ७ । इत्यमरः ॥ शताह्वा ८ शतपुष्पिका ९ मधुरिका १० शताह्वा ११ छत्रा १२ मिशिः १३ मिशी १५ । इति शब्दरत्नावली ॥ माधवी १५ घोषा १६ । इति जटाधरः ॥ अस्या गुणाः । मधुरत्वम् । वातपित्तहरत्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ * ॥ क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । शताह्वा २ मिसिः ३ घोषा ४ पीतिका ५ अतिच्छत्रा ६ अवाक्-